(612x747x24b jpeg)



ॐ

# ॥अथतंत्रहृदयं॥

## ॥अभिध्यानपटलःप्रथमः॥

1 श्रीकंठःकेशवोऽकारोनिवृत्तिरलिकस्थली॥

प्रतिष्ठावृत्तमाकारोऽनंतोनारायणोऽहिराट्॥

2 इकारोमाधवःसूक्ष्मोविद्यादक्षिणलोचनं॥

शांतिस्त्रिमूर्तिर्गोविंदईकारोवामलोचनं॥

3 अमरेशोविष्णुरुस्यादिंधिकादक्षिणश्रुतिः॥

षष्ठोऽर्घीशःश्रुतिर्वामादीपिकामधुसूदनः॥

4 ऋकारोदचिकानासाभारभूतिस्त्रिविक्रमः॥

ॠकारोवामनासास्यान्मोचिकावामनोऽतिथिः॥

5 लृकारःश्रीधरस्थाणुःपरादक्षिणगंडमः॥

सूक्ष्माहरोहृषीकेशोदशमोवामगंडमः॥

6 सूक्ष्मामृतापद्मनाभोझिंटीशोष्ठभगाअथि॥

दामोदरोऽधरोज्ञानामृतैकारस्तुभौतिकः॥

7 ओकाराप्यायनीसद्योजाताःसंकर्षणोद्विजः॥

अथौद्विजोवासुदेवआविन्यापिन्यनुग्रहः॥

8 प्रद्युम्नोबिंदुरक्रूरोव्योमरूपाबिलंशशी॥

सर्गोऽनिरुद्धोऽनंतोऽस्यमहासेनोविसर्गकः॥

9 चक्रीक्रोधीश्वरोब्रह्मा कः सृष्टिर्दक्षिणो भुजः॥
दक्षिणः कूर्परः खः स्याद्दक्षिश्चंडीश्वरो गदी॥
10 हेरंबो मणिबंधो गः शार्ङ्गी पंचातकः स्मृतिः॥
दक्षिणांगुलिमूलं घः खड्गी मेधा शिवोत्तमः॥
11 संड्डौ करुद्रः शंखी स्यादंगुल्यग्रं ङकारकः॥
कूर्मश्चलो वामबाहुश्चो हली स्वर्णदेवता॥
12 छः शनिः कूर्परो वामो मुसली द्युतिरेकदृक्॥
जस्तु शूली स्थिरा वाममणिबंधश्चतुर्मुखः॥
13 स्थितिर्वामांगुलीमूलं पाश्यजेशो झकारकः॥
यमः सार्वौ कुशी सिद्धिर्वामांगुल्यग्रगश्च ञः॥
14 स्कंदो मुकुंदसोमेशो दक्षिणोरुर्जरा चटः॥
नंदजः पालिनी दक्षजानु लांगलिनो ठ॥
15 क्षांतिश्च क्षालको नंदी डकारो दक्षगुल्फगः॥
ढोऽर्घ्यो षो नरः पादांगुलीमूलगं एश्वरी॥
16 उमेशो णो नरकजित्पादांगुल्यग्रगो रतिः॥
तीव्रस्तकार आषाढी वामोरुः कामिकाहरिः॥
17 कृ

१७ कृष्णोदंष्ट्रीविशालाक्षीवामजानुथकारकः॥
अत्रीशाल्ह्लादिनीसत्योदःशैलोवामगुल्भगः॥
१८ सव्यपादांगुलीमूलंधमीनप्रीतिसात्वता॥
नेवामाघ्रंगुलीशृंगनादिनीमेषशौरयः॥
१९ लोहितादक्षिणंपार्श्वंशरस्तीक्ष्णानृपश्चप॥
फकारंतुशिखादरौद्रीवामपार्श्वंजनार्दनः॥
२० अभयाभूधरःपृष्ठंधुगतोडोबकारकः॥
विश्वमूर्तीर्ह्रिदंडेशोनाभिर्निद्राभकारके॥
२१ मेमहाकालवैकुंठतंद्रोदरदिवाकरः॥
येयामुन्नौरौवायुत्वग्वात्निक्षुत्पुरुषोत्तमः॥
२२ दक्षिणंविग्रहस्यार्धंक्रोधिनीरुचिरोबलः॥
रक्तमाग्निर्भुजंगेशोरेफस्तंत्रेषुगीयते॥
२३ पिनाकीशःककुद्दशःक्रियाशक्तोबलानुगः॥
मांसधातुर्वसुमतीलकारःपरिकीर्तितः॥
२४ वामंकलेवरस्यार्धंमुक्तारीयादसांपतिः॥
बालःखड्गीश्वरोमेदःसलिलंचवकारकः॥

4

२५ हृदादिदक्षपार्ष्यंतोवृषघ्नोऽस्थिबकेश्वरः॥
शंकुकर्णःसुखंमृत्युःशावर्णःपरिकीर्तितः॥
२६ हृदादिवामपार्ष्यंतोमज्जाश्वेतेश्वरोवृषः॥
पुरुषश्चहरिद्राभाषकारःपरिकीर्तितः॥
२७ हृदादिदक्षपादांतःशुक्रंहंसाह्वयोभृगुः॥
समयःसंगतिश्चेतिसकारःपरिकीर्तितः॥
२८ हृदादिवामपादांतोवराहोनकुलीश्वरः॥
अरुणागगनंप्राणोहकारःपरिकीर्तितः॥
२९ हृदयाद्युदरंश्यामाळकारोविमलःशिवः॥
संवर्तकोहृदाद्यास्यंक्षेवज्ञान्तहरिर्गृहं॥
३० यत्रांमान्यविशिष्ठानिसंज्ञयामुत्तरत्रवा॥
भागोदक्षिणऊर्ध्वौवातत्रग्राह्योविचक्षणैः॥
३१ सख्येयेनक्वचित्संज्ञाःसंख्याभिरपिकुत्रचित॥
क्वचिद्रूपेणयोगेनक्वचिदाकृतितोलिपीः॥
३२ सद्योजातश्चंद्रसूउस्त्रिमात्रस्त्रिवृदुच्यते॥
३३ तारकोब्रह्मवेदादिस्तारश्चप्रणवोध्रुवः॥

33 चक्रीधराशांतिरनुष्णभानुः॥
श्लिष्टाः प्रसूनायुधबीजमुक्तं॥
क्रोधीश्वरः कृष्णगतिस्त्रिमूर्तिः॥
शशीमिलंतोरसनायकाली॥
34 क्रोधीश्वरस्थानगतेवराहे॥
काव्येवगौरीगिरिजात्रपाच॥
लोकस्यराज्ञीहृदयस्यलेखा॥
लोकश्चमायागिरिशस्यजाया॥
35 बकेतुबीजंकमलासनाया॥
दामोदरश्चंद्रयुतस्तुवाणी॥
प्राणोऽग्निनाथामृतरश्मियुक्तः॥
क्रोधस्यकूर्चस्यचबीजमुक्तं॥
36 अनुग्रहेशेंदुयुतंवराहं॥
प्रासादबीजंकथयंतिसंतः॥
नारायणश्चंद्रयुतस्तुपाशः॥
करेफताराः सहिताः सृणिःस्यात्॥

37 कालस्तुशक्तिःसचतुर्दशाख्यो॥
वधूःसतीव्रानलशांतिचंद्राः॥
यशस्विनीशापविवर्जितासा॥
तारैवतारागमविद्भिरुक्ता॥
38 नादिनीकमलिनीप्रियसर्गैः॥
पल्लवंस्वतुहृदयस्यवदंति॥
संयुताःसमयवारुणशोषाः॥
शोषयुक्चनकुलीशिरसस्तु॥
39 ऊह्यंभणितमग्निकलत्रं॥
पल्लवंतदिदमागमविद्भिः॥
वार्षोऽस्वरगुहश्चशिरस्काः॥
सैंधिकेंदुगगनंकवचस्य॥
40 वार्यधोरदयुतंधवलेशो॥
निःस्वरःशारभवोनयनानां॥
अस्त्रपल्लवमुदाहृतमार्यैः॥
पांत्यमस्वरच्यमूर्पतिचूडं॥

॥ अथकालीपटलो द्वितीयः॥

1 शक्तेर्विभूतिभेदेन विद्याभेदः प्रकीर्तिताः॥
तंत्रेषु पूर्वैराचार्यैर्दशशीघ्रफलप्रदाः॥
2 कालीतारा सुंदरी च भुवनेशी च भैरवी॥
छिन्नाज्येष्ठा च बगलामातंगीकमलात्मिका॥

॥१॥ कालीमहाविद्या॥

3 जिह्वात्रयंकूर्चयुगंत्रपेद्वे॥
सत्योनृसिंहः सहमाधवेन॥
रतिःसयोनिर्द्रुहिणस्यवृत्तः॥
पुरंदरोदक्षिणनेत्रयुक्तः॥
4 क्रोधीरसूक्ष्मामृतयोःसमेतं॥
हूंहूंपुनश्चक्रिगुणारसज्ञा॥
क्रोधावुभौलोकयुगंकृशानोः॥
कांतेतिविद्याकथितेयमाद्या॥
5 भैरवउष्णिक्कालीमुनिमुख्या अस्यमंत्रराजस्य॥
बीजमभाणिरसज्ञाशक्तिर्लोकोऽथकीलकंक्रोधः॥
6 विनियोगः सर्वासांसिद्धीनांसाधनेसमाख्यातः॥
षड्दीर्घयुक्तकाल्याकरविन्यासस्तथांगविन्यासः॥

7 निगृण्हंतीचेतो निजपदरतानांरिपुगण॥
प्रणाशंकुर्वाणासकलवरदापत्तशमनी॥
पिशाचस्त्रीवेषासहकपटभूतेनविभुना॥
श्मशानेक्रीडंतीहदिवसतुकालीममसदा॥
8 निशिलक्षंदिवालक्षंदिव्यभावमुपाश्रितः॥
संश्रितोवावीरभावपशुभावोजपेन्मनुं॥
9 अयुतंजुहुयात्पश्चात्सयोगार्होभवेन्मनुः॥
स्त्रियोननिंदेन्नोवीरान्कालीभक्तस्यतद्धृतं॥
10 करोतीत्यनयावृत्यानिष्पन्नंबीजमादिमं॥
इहतस्यषडावृत्यासृष्टोशक्ततमोमनुः॥
11 सर्वेषामपिभावानांस्रष्टाकेवलईश्वरः॥
तन्नियत्यविरोधेननृणांस्रष्टृत्वमिष्यते॥
12 यत्कवित्वप्रदाविद्याकाल्याइत्यागमेप्रथा॥
विद्याशक्त्येश्वकंदेशस्यबोधव्यंतत्प्रदर्शनं॥
13 ईशःस्यात्सर्वसिद्धीनांविद्यामेतामुपाश्रितः॥
लोकेश्वरीचतुष्कस्यप्रभावादहितक्षये॥

14 क्रोधबीजचतुष्कस्यप्रभावादहितक्षये॥
समर्थोमंत्रराजोऽयंशिरसातुष्टिपुष्टिकृत॥
15 भुवनांतोचितंभीमंबिभ्रत्या अपिविग्रहं॥
भक्तानुकूल्यंवक्तव्यत्रविधायान्दक्षिणापदं॥
16 कालमेवाविदुःकालींस्त्रीलिंगेनविपश्चितः॥
कर्मेंद्रियंपाणिसंज्ञंकालीत्यध्यात्मचिंतकाः॥
17 हरस्यपंचकृ:खलुशक्तिरेव॥
कालश्चकालीत्यबुधैरभाणि॥
प्रपंचनाथस्यपुमाकृतित्वे॥
नार्याकृतित्वंपरदेवतायां॥
18 पाणे:प्राधान्यतःप्राहुःक्रियासुसकलास्वपि॥
क्रियाशक्तिस्वरूपत्वात्कालिकांपाणिमिंद्रियं॥
19 आत्मापक्तास्फुरंश्चेतिद्विविधःसंप्रकीर्तितः॥
भूतानांपरिणामस्यहेतुःपक्तासदाज्वलन॥
20 मंडलेहृदयेचेतिद्वैविध्यंस्फुरतःस्मृतं॥
आद्योहिरण्यगर्भःस्याद्ब्रह्माजीवोऽपरोविराट्॥

२१ जीवनामव्यक्तिपक्षेविराजःसूरयोविदुः॥
तस्यैवजातिपक्षेतुविष्णुनामप्रचक्षते॥
२२ पक्कारंसर्वभूतानांशिवमाहुर्महेश्वरं॥
पक्कुस्यस्फुरतश्चापिविभेदोनास्तिवस्तुतः॥
२३ जगत्कर्तुर्यथास्माकंपाणिर्यद्यपिनेशितुः॥
व्यष्टौविभूतिराधायास्तथाप्यत्रप्रदर्शिता॥

।।२।। आद्यैकाक्षरी॥

२४ पृथक्चोपास्यमंबायाबीजमेत्रंप्रचक्षते॥
अष्टसिद्धीश्वरोवाग्मीतज्जप्तेनवाभवेत॥

।।३।। कामकलाविद्या॥

२५ अथानुविद्यामाद्यायावक्ष्येकामकलाह्वयां॥
यस्यास्तंत्रेषुबहुधामहिमासंप्रगीयते॥
२६ कामोगणेशोऽनलशांतिचंद्री॥
क्रोधःसतारोजलजातगर्भः॥
हपूर्वकाद्रीदहनत्रिकोण॥
ग्लुवोयुताःपंचमबीजमुक्तं॥

27 वृत्तान्वितौत्र्यक्षिसहस्त्रनेत्रौ ॥
सूर्याजगर्भौद्रुहिणःसवृत्तः ॥
भूर्दक्षनेत्रेण विपर्ययेण ॥
बीजानि पंचाग्निवधूश्चमंत्रः ॥
28 ऋषिरस्यमहाकालोबृहतीछंदउच्यते ॥
कालीकामकलानामदेवतापरिकीर्तिता ॥
29 प्रसूनमार्गणोबीजंक्रोधःशक्तिरुदीर्यते ॥
कीलकंपंचमंबीजं विनियोगोऽखिलाप्तये ॥
30 प्रत्येकं बिंदुसंयुक्त नामाक्षरसमन्वितैः ॥
बीजस्तुपंचभिर्नाम्नाकरांगन्यासईरितः ॥
31 विविधप्रहरणविद्या ॥
पिधानवेत्रीं रिपुक्षयेघोरां ॥
प्रेतभुविसंचरंतीं ॥
पिशाचिकावेषमद्भुतंदधतीं ॥
32 आहितपशुभयमोहं ॥
कामकलानामभावतोदधतीं ॥
समलंकृतां शिवाभ्यां ॥
पार्श्वद्वितये प्रचंडरावाभ्यां ॥

12 33 सर्वांगशक्तिपूर्णां॥

जंबू[illegible]फलमेच्यकामदुष्टांगीं॥

कालीं ज्वलत्रिनयनां॥

ध्यायेत्संहारनायकासक्तां॥

34 पुरश्चरणमाद्यावदस्यास्तंत्रेषुगीयते॥

साधनेसर्वसिद्धीनांमेषाविद्योत्तमोत्तमा॥

॥४॥ गुह्यकालीविद्या॥

35 आद्याया अनुविद्यान्यागुह्यकालीसमीर्यते॥

संश्रितागुप्तविद्यायांसर्वसिद्धीश्वराभवेत्॥

36 ध्रुवोरौद्रीजातवेदायोनिप्रद्युम्नसंयुता॥

हंसोविद्यायुतोयुक्ताःशैलसात्वतमाधवाः॥

37 द्रुहिणोदहनःशेषीशक्रोदक्षिणनेत्रवान्॥

क्रोधस्यानंतरंबीजमाद्यायांसमुदीरितं॥

38 एकनेत्रोधर्मा [सा] पूर्वगोविंदतुहिनांशुमान्॥

पूर्वमंदाक्षतोबीजमाद्यायांसंप्रदर्शितं॥

39 सीमंतिनीपुनर्बीजं द्वितीयमिहदर्शितं

हृदयंवह्नितरुणी विद्येयंषोडशाक्षरी॥

ओं फ्रें सिद्धिकरालि ह्रीं छ्रीं हूं स्त्रीं फ्रें नमः स्वाहा।

# तंत्रहृदयं

५० अथर्वा ऋषिरस्यस्या जगती छंद उच्यते ॥
देवता गुह्यकाली स्यात्क्रोधो बीजमुदीर्यते ॥
५१ शक्तिस्यान्नवमं बीजं द्वितीयं कीलकं विदुः ॥
द्विपंचाग्नि द्विनेत्र द्विवर्णैर्न्यास उदाहृतः ॥
५२ ज्ञानरश्मिच्छटाटोप ज्योतिर्मंडलमध्यमां ॥
लोकमानान्दशदिशः कार्यभारान्प्रतिक्षणं ॥
५३ ततः शीतां यतः सव्या यतो भक्ताः शिवां यतः ॥
अन्यतो दिक्षु सर्वासु प्रज्वलत्तीव्रलोचनां ॥
५४ भीमामाकर्षणीं शूरां चंचलां धीमतीं दृढां ॥
समदां सजवां सर्वग्राहिणीं संततक्रियां ॥
५५ विविधायुधविधासु निष्णातां शत्रुमर्दिनीं ॥
नायिकां सर्वसिद्धीनां गुह्यकालीं विचिंतयेत् ॥
५६ शुद्धो लक्षं जपेन्मंत्रमयुतं जुहुयाद्धुती ॥
ततः क्षमो भवेन्मंत्रः सर्वसिद्धिप्रसाधने ॥

॥ तारापटलस्तृतीयः ॥

॥ तारामहाविद्या ॥

~~तन्त्र्यक्षरी~~

५ ॥ तन्त्र्यक्षरी ॥

1 कांचिन्मायां पुरस्कृत्य सकूर्चा दृश्यते वधः ॥
नीलां सरस्वतीमेतां प्राहुरागमपारगाः ॥

६ ॥ चतुरक्षरी ॥

2 अंततो बिभ्रतीं शस्त्रं नीलामेकजटां विदुः ॥

७ ॥ पंचाक्षरी ॥

~~7~~ ध्वनंतीमादितस्तारं तां तु गायंति तारिणीं ॥

॥ तिसृणामृष्यादि ॥

3 अक्षोभ्यमुनिरेतेषां बृहती छंद इष्यते ॥
त्रयाणामपि मंत्राणां तारा देवी परात्परा ॥
4 क्रोधो बीजं शिवा शक्तिः कीलकं वामलोचना ॥
षड्दीर्घभाजा शिवया करांगन्यासई रितः ॥
5 तारा परा वाक्कुहना पिशाची ॥
सिद्धीश्वरी सिद्धाधिपतेर्वधूटी ॥
नमन्मनो निग्रहकृद्रिपुघ्नी ॥
गंधिध्वदानंदकरी विचिंत्या ॥

6 कामचारीजपेल्लक्षमयुतंजुहुयाज्जनः॥
ततःसिद्धाभवेद्विद्यान्निविद्याऽभीष्टसाधने॥
7 विद्येयमचिरात्सिध्येल्लब्ध्वानारीमुखाद्यदि॥
तस्मादस्याःप्रपश्यामोनारीगुरुपरंपरां॥
8 शापःकृष्णावतारांतइतिपक्षंसमाश्रिताः॥
नपठंतिभृगुंकेचिद्वधूबीजेमनीषिणः॥
9 अस्तुवामास्तुवाशापोभृगुरत्राधिकोमनौ॥
अर्थतःशब्दतःश्चापिगुणायैवप्रकल्पते॥
10 अक्षरस्याभ्यनुज्ञाताशक्तिश्चेच्छापमुक्तये॥
समयस्यावधिंतत्रप्रपश्यामोनसार्थकं॥
11 तस्माद्वसिष्ठशापस्यविमोक्षायगुणायच॥
पूर्णमेववधूबीजंवक्तव्यंनभृगुंविना॥
12 महाचीनक्रमेणैतामुपास्यामाहुरंबिकां॥
विशुद्धोमानसोभावोमहाचीनक्रमोमतः॥
13 सिद्धेनपित्रामात्रावापुरश्चरितविद्यया॥
अकृत्तनाभेर्जातस्यजिह्वायांलक्षरोमनुः॥

14 लेख्यैर्गौरोचनाक्तेनकुशेनसकुमारकः॥
असंशयंभवेद्विद्वान्विधाताचाद्भुतोगिरां॥
15 सकलमपिवावेदार्णवागुणार्णमथापिवा॥
मुनिजननुतंतारामंत्रंजपेद्यदिमानवः॥
अमृतजलधीभूतःपूतःप्रयोगविशेषवित्॥
सइहवसुधालोकेधारागिरामभिवर्षति॥
16 इममभिमुखीभूत्वाशातोदरीकमलालया॥
हयगजघटापूर्णाभ्यर्णंसमेत्यनिषेवते॥
सविबुधमिदंविश्वंतस्यप्रयातिपुनर्वशं॥
प्रथितयशसांसिद्धीनांचाप्यमुंभजतेऽष्टकं॥
17 सुविमलधियस्तस्यक्रोधाद्दृगंबुधुतद्युती॥
रिपुजनवधूगंडाभोगोभवेद्द्रुतपांडुरः॥
सखलुभुवनंव्याप्तंचाप्तैःप्रमाणपुरःसरं॥
भणितमजरंभद्रंज्योतिःपरंपरिपश्यति॥
18 तारणादुदितातारावागेवजगतांप्रसूः॥
जनयंतीविभोःशक्तिःसंततंशब्दमंबरे॥

तंत्रहृदयं



१९ निनादोयोयमव्यक्तः संततः खेविजृंभते॥
तपोदृष्टेषुमंत्रेषुसगीतोब्रह्मणस्पतिः॥
२० ब्रह्मणस्पतिमेवाहुरागमेषुगणेश्वरं॥
तारागणेशजननी तस्मादयैः प्रकीर्तिता॥
२१ शब्दायमानस्यहरस्यशक्तिः।
ताराच्चवाकचापिबुधैरभाणि॥
प्रपंचनाथस्यपुमाकृतित्वे॥
नार्याकृतित्वंपरदेवतायाः॥
२२ वक्तुर्हिरण्यगर्भस्यशक्तिरुक्तासरस्वती॥
ईशस्यताराकथिताविशेषस्त्वनयोरयं॥
२३ अव्यक्तमेवप्रणवंजनयेदीशभारती॥
व्यक्तांश्चविविधावाचःस्फुरतस्तुसरस्वती॥
२४ ईशवाक्तामसीनीलाव्यक्तोनास्याध्वनिर्यतः॥
श्वेताहिरण्यगर्भस्यसात्विकीसत्यवादिनी॥
२५ आद्येतासामुपास्यत्वाद्देवतेसंप्रकीर्तिते॥
विराजोराजसीचित्रावाणीविविधवादिनी॥

18 26 तारातुप्रकृतिस्तासामन्येतुविकृतीमते॥
तारान्निषेवमाणेनसर्वावाणीनिषेविता॥
27 सत्यमेवप्रवक्तव्यंताराभक्तेननानृतं॥
अनृतंप्रवदन्पापोहन्यादेवसरस्वतीं॥
28 भिन्नातिसृभिराख्याभिरेकरूपापिवस्तुतः॥
द्वितीयेवंमहाविद्यावर्णितापापनाशिनी॥
29 क्रियाशक्तिःपिशाचीववामैवभुवनेसतां॥
तस्मात्कालीचताराचपिशाच्यौसंप्रकीर्तिते॥

---

॥सुंदरीपटलश्चतुर्थः॥

॥त्रिपुरसुंदरीमहाविद्या॥

6 ॥तन्त्रादौमूलम॥

+

1 ब्रह्मायोनिःशांतिरिंद्रोभवानी॥
प्राणोहंसःसृष्टिरम्भंधरार्या॥
हंसोब्रह्माभूतधात्रीशिवेति॥
प्रोक्तासेयंसुंदरीमूलविद्या॥

॥आधारविद्या॥

2 अम्नायानामक्षराणांत्रयंचे॥
दभांशुक्तं सृष्टिरन्यत्समानं॥
लोपामुद्रानामसाहादिविद्या॥
तामेवार्याः प्राहुराधरविद्यां॥

॥ तारतम्यपूर्वक उभयत्रकूटविभागः॥

3 ब्रह्मा शक्रश्चादितौ शैवर्णौ
योनिःशांतिर्भृ भृगुःशक्तिवर्णाः॥
लोकेशानीशक्तिरुद्रो भयाला॥
मूलंतस्माच्छक्तमाधारतःस्यात॥

4 आधंकूटंवाग्भवंयुग्मकेऽस्मि॥
न्नायेरुक्तंकामराजंदितीयं॥
तार्तीयीकंकथ्यतेशक्तिकूटं॥
कूटान्यवंत्रीणिविद्याद्वयेपि॥

5 पद्मागौरीमन्मथोब्रह्मजाया॥
शक्तिस्तारःपार्वतीमानिकूटा॥
शक्तिर्वाणीकामलोकौरमेति॥
श्रीविद्येयंषोडशीमंत्रराजी॥

२० ६ शक्त्यंतानामादितःकूटतोक्ता ॥
तारादीनांकूटतास्यात्त्रयाणां ॥
शक्त्यादीनांकूटतोक्तावसाने ॥
षट्कूटैवंमूलकूटैःसहेयं ॥
७ मूलेयेयंघस्त्रवर्णात्त्रिकूटा ॥
षोडश्यांसासंप्रदायात्त्रिवर्णी ॥
तस्मादुक्तानायिकेयंमनूनां ॥
मष्टाविंशत्यक्षरीषोडशीति ॥
८ श्रीबीजाढ्याषोडशीमूलविद्ये ॥
त्येकेप्राहुर्वर्णसंख्यांभजंतः ॥
संगच्छंतेनैवतंत्राणितेषां ॥
न्नासव्याख्यानान्नीकिंचित्करीस्यात ॥
॥ तिसृणामृष्यादि ॥
९ मुन्याद्यार्षंदक्षिणामूर्तिपंक्ति ॥
श्रीसुंदर्योऽमुष्यमंत्रत्रयस्य ॥
बीजंप्राहुर्वाग्भवंशक्तिकूटं ॥
शक्तिंप्राहुःकीलकंकामराजं ॥

10 आवृत्तेनर्द्धिस्तुमंत्रेणमूल ॥
त्वाधारेवान्यासउक्तोबुधेंद्रैः ॥
षड्भिःकूटैरुच्यतेमंत्रनाथे ॥
ध्यायेत्पश्चात्सर्वलोकाधिराज्ञीं ॥

11 बंधूकपुष्पकमनीयरुचिस्त्रिनेत्रा ॥
बालामृतांशुमुकुटेप्सितदाखिलांबा ॥
स्निग्धाशिवेरिपुजनेकुपितासमस्त ॥
संमोहिनीनतहिताललिताविचिंत्या ॥

12 एतेषुतंत्रचयसारतयोद्धृतेषु ॥
मंत्रेषुधीरमतिरन्यतमंगृहीत्वा ॥
लक्षंजपेद्दशगुणंजुहुयात्सहस्रं ॥
सिद्धोमनुर्भवतिकाम्यजयायपश्चात ॥

13 तस्यालयेभगवतीकमलास्थिरास्या ॥
त्सद्योवशेभवतितस्यजगत्समस्तं ॥
सोऽयंकृतीरमयतेहृदयेनयुक्ता ॥
न्पीयूषसारतुलितैरनघैर्वचोभिः ॥

14 निःशान्तवद्सरमतेचिरमन्त्रलोके ॥
तंवृण्वतेस्वयमुपेत्यचसिद्धयोऽष्टौ ॥
साक्षात्करोतिसपरं भुवनस्यबीजं ॥
यंःसुंदरींजपतिपूतमनामनुष्यः ॥
15 तत्वाक्षरीन्निगमसारमुदाहरंति ॥
मूलंत्रिकूटयुतमागमसारमाहुः ॥
तच्चाभ्यपेत्यखिलमंत्रगणाधिपत्ये ॥
श्रेष्ठत्रिबीजकलितंशरबीजरुद्धं ॥
16 प्रज्ञानभूतेश्वरधर्मभूत ॥
ज्ञानात्मिकेयंपरदेवतोक्ता ॥
हिरण्यगर्भस्यतुधर्मभूतं ॥
ज्ञानंच्चतुर्विंशतिवर्णगम्यं ॥
17 यत्रस्फुटंकेवलमात्मरूपं ॥
तमीशबोधंकथयंतिसंतः ॥
हैरण्यगर्भस्यउदारबोधो ॥
विभासतेयत्रजगच्चसर्वं ॥

१८ हिरण्यगर्भस्यसदासमाधि ॥
ज्ञानंचलोकस्यविनाविरोधं ॥
भोगोऽपरेषांनिजरूपभोगी ॥
भेदाब्रह्मात्तस्यलयंप्रयाति ॥
१९ ईशोत्वसंकीर्णतयासमाधि ॥
र्नित्यश्चिदानंदमयोऽभिलाष्य: ॥
तँदेवतत्वंस्पृहणीयमस्या: ॥
श्रीमातुराचार्यमुखाच्छ्रुतंन: ॥
२० बोधोविराजोविविधोविभाति ॥
विमुक्तयेसंसृतयेन्वयः स्यात ॥
विमुक्तयेस्यात्तपत: प्रबोधो ॥
बहिर्हृशा: संसृतयेविबोध: ॥
२१ विराजिंदेवागतिरुत्तमासा ॥
विधेशितुर्भातिसमाधिकाले ॥
सेवान्यदास्याद्विषयैर्विभक्ता ॥
नानेवयन्नप्रातितिष्ठतीदम ॥

२२ हरस्यबोधुःखलुशक्तिरेव॥
श्रीसुंदरीधीश्चबुधैरभाणि॥
प्रपंचनाथस्यपुमाकृतित्वे॥
नार्याकृतित्वंपरदेवतायाः॥
२३ वियत्वनंतंप्रथमंपुरंस्यात॥
सूर्यस्यबिंबंतुपुरंद्वितीयं॥
पुरंजनानांहृदयंतृतीयं॥
मातुर्यदस्यास्त्रिपुरातदेषा॥
२५ प्राणेषुसैयंदशासुप्रदिष्टा॥
चक्षुर्मयीचिन्मयशक्तिरंबा॥
ध्येयंहिजाबालमुनिर्महात्मा॥
तत्रैवबोधंनिजमाबभाण॥
२६ विभ्राजंतेऽधोहृदयस्यमत्र॥
मग्नंभ्रुवोरंतरतश्चकास्ति॥
देवीपुरत्वंज्वलतोःसतस्मा॥
नासंगतंल्लोचनमंडलस्य॥

२६ य एवंविद्वांसो नयनयुगलेवाथह्न दिवा ॥
जगद्धात्रींरात्रिंप्रियतमकलाबद्धमुकुटां ।
विविक्तांरूपाद्यैरखिलविषयैःसंविदमुमा ॥
ममुंचंतोनित्यंदधतिसकलंतैःखलुजितं ॥

॥ बाला ॥

२७ प्रीतयेमनुविदामनुविद्या ।
प्रोच्यतेबहुगणा त्रिपुरायाः ॥
वाक्स्मरो भृगुरनुमहसर्ग ॥
स्त्र्यक्षरीयमखिलागमगीता ॥
२८ श्रेष्ठमाहुरनुलोमविलोमा ॥
ज्जप्यमानामिममुत्तममंत्रं ॥
षोडशीवदृषिमुख्यममुष्याः ॥
देवताभगवतीतुकुमारी ॥
२९ कूटानांत्रयमिवमूलमंत्रराजे ॥
बीजानांत्रयमिहसंज्ञयाप्रदिष्टं ॥
विधेयंभवतिविराट्प्रबोधरूपा ॥
मूर्धास्यानयनयुगंचहृत्पुराणि ॥

३० अनुलोमविलोमतः षडंगं॥
त्रितयेनात्ततुमूलवर्णकानां॥
परिशुध्यमनास्ततोमनुष्यो॥
हृदिदेवीमनुसंदधीतबालां॥
३१ अरुणाकरुणातरंगिताक्षी॥
सुभगापातकहृत्कविर्जपंती॥
अमृतांशुकलाकनत्कलापा॥
नववर्षाहृदिबालिकाविचिंत्या॥
३२ लक्षत्रितयंतुजपस्त्रिंशत्साहस्रमुच्यतेहोमः॥
तदनुमनुःसंसिद्धःसाधयितुर्भवतिकल्पद्रुः॥
३३ मैथिलास्तुकवयंतिनीलया॥
द्राविडास्तुकवयंतिबालया॥
तद्वयोऽमृतवितृप्तचेतसां॥
किंनुवामनयनोक्तलालया॥

॥ उपसंहारः॥

३४ एतास्तिस्रः पराविद्याः कालीताराश्चसुंदरी॥
आद्येभेदौक्रियाशक्ते ज्ञानशक्तिस्तथोत्तरा॥

35 पाणिस्त्वंस्थूलदृष्ट्योक्तंप्राणरूपैवकालिका॥
चक्षुस्त्वंस्थूलदृष्ट्योक्तंचितिरूपैवसुंदरी॥
36 गृहीत्वानुचितिच्छायांप्राणोवागात्मतांव्रजेत॥
तद्वाकप्रवृत्तिज्ञानंक्रियारूपापिवस्तुतः॥
37 विरलाज्ञानशक्तिःस्यात्क्रियाशक्तिर्घनामता॥
विरलत्वघनत्वाभ्यांशक्तेर्द्वैविध्यमागतं॥

---

## ॥भुवनेश्वरी पटलः पंचमः॥

## ॥ भुवनेश्वरीमहाविद्या॥

1 अरुणांकेवलामुक्त्वाक्रोधिनीमथकेवलां॥
शांतिंततःसमुच्चार्यव्योमरूपांसुद्धरेत॥
2 चतुर्थीयंमहाविद्याच्चतुःशक्तिसमुद्भवा॥
कृष्णाद्याःशक्तिगायत्रीभुवनेश्यःप्रकीर्तिताः॥
3 षड्दीर्घयुक्तबीजेनषडंगन्यासमाचरेत॥
अथध्यायेन्महादेवींसर्वभूतैकमातरं॥
4 पापघ्नीवत्सलासर्वदायिन्यापत्प्रणाशिनी॥
तप्तकार्तस्वरच्छायाध्येयाचित्तेनशांभवी॥

५ द्वात्रिंशल्लक्षसाहस्रं जपेद्विद्यामनन्यधीः॥
परमं पश्यति ज्योतिः सर्वग्रंथीन्विभिद्यसः॥
६ मूलविद्या यथांबयाः सावित्री तां विशिष्यते॥
तथा वा बीजविषयं प्रणवाच्च विशिष्यते॥
७ यश्च स्तुयोनिं भूतानामाकाशमदितिं विदुः॥
भणंत्यनंतां तामेव तंत्राणि भुवनेश्वरीं॥
८ अधः पृथिव्याश्च दिवः परस्ता॥
यच्चांतराद्दृश्यमिदं समस्तं॥
वदत्यथ्यामदितौ तदोतं॥
प्रोतं च गार्गीं प्रति याज्ञवल्क्यः॥
९ ओतं च प्रोतमेतस्यामदितौ भुवनं यतः॥
तदेषा प्रकृतिः प्राज्ञैरुच्यते भुवनेश्वरी॥
१० ईशस्य प्रथमा दृष्टिः राकाश इति भण्यते॥
अशेषलोकचिन्त्राणां भित्तिरंतविवर्जिता॥
११ इच्छाशक्तिरयं ज्ञेया परमस्य महेश्वरी॥
इच्छेक्षा प्रथमा दृष्टिरित्यनर्थांतरं भवेत॥

12 प्रथमेक्षायथास्माकंस्वप्नेदेशायकल्पते ॥

प्रथमेक्षातथेशस्यसर्गेदेशायकल्पते ॥

13 अनंतराणांवृत्तीनांमुक्ताज्ञानक्रियात्मता ॥

व्यापारः प्रथमःशक्तेर्देशभाव उदाहृतः ॥

14 भित्तिस्थानंविनादेशन्नचज्ञानन्नचाक्रिया ॥

तच्चतुर्थींविनादेवींनतृतीयानचादिमे ॥

15 तामेतामखिलेशानींमूलप्रकृतिमव्ययां ॥

भित्तिभूतामशेषस्यमायांप्राज्ञाःप्रचक्षते ॥

16 व्याप्तस्यसर्वत्रहरस्यशक्तिं ॥

देशश्चमायाचबुधैरभाणि ॥

प्रपंचनाथस्यपुमाकृतित्वे ॥

नार्याकृतित्वंपरदेवतायाः ॥

17 पिंडेषुभुवनेशानीश्रोत्रमिंद्रियमीर्यते ॥

श्रुत्यंतचिंतकैःश्रोत्रंदिग्देवत्यंहिकथ्यते

॥ १३ ॥ सारस्वतचिंतामणिः ॥

18 मंत्रोऽयंभुवनेश्वर्याःसंरुद्धस्त्रिवृतायदि ॥

भवेच्चिंतामणिर्नामश्रेष्ठःसारस्वतप्रदः ॥

१४॥अन्नपूर्णा॥

१९ अनुविद्यामथैतस्याश्चतुर्थ्याः परिचक्ष्महे॥
दारिद्र्यं दूरतः कुर्यात्साधको यामुपाश्रितः॥

२० आदिः श्रुतीनां भुवनस्य धात्री॥
शुद्धांतनारी मधुसूदनस्य॥
प्रसूनबाणो हृदयं द्विरंडः॥
पंचांतको वारिहरिः ससूक्ष्मः॥

२१ त्विषांपतिर्माधवमंचशायी॥
श्लिष्टोऽथ सूक्ष्मामृतया वराहः॥
ऊष्मादिरंतस्थसमापकेन॥
साकं समावेत रलोचनोऽग्निः॥

२२ आदिस्वराणामनुनासिकेद्धः॥
दंत्ये युतेऽर्घीश युतो नृपालः॥
रतिस्त्रिकोणी दहनस्तदंतः॥
पुरेश्वरीत्येति मनुर्नखार्णः॥

२३ ऋषिः स्यान्नाभिजन्मास्य छंदः कृतिरुदीर्यते॥
देवतान्नपूर्णेशी बीजादि गिरिजादिकं॥

24 षड्दीर्घभाजाबीजेनकरांगन्यासमाचरेत ॥
ततोध्यायेदन्नपूर्णांविशालाक्षींमहेश्वरीं ॥
25 तप्तःस्वर्णरुचिःसुधांशुमुकुटाक्षौणीरमासेविता ॥
माणिक्याभरणान्विताविरजसाचित्रांशुकंबिभ्रती ॥
अन्नंविग्रहधारिणेप्रददतीनेत्रत्रयोल्लासिनी ॥
विश्वाधीश्वरनाट्यलोकनरताध्येयान्नपूर्णेश्वरी ॥
26 लक्षमेकंजपेद्विद्वांजुहुयादयुतंजनः ॥
ततोभवेत्प्रयोगार्हःसोऽयमत्युत्तमोमनुः ॥

---

॥ षष्ठस्त्रिपुरभैरवीपटलः ॥

॥ त्रिपुरभैरवीमहाविद्या ॥

1 नकुलिहंसकृशानुगिरायुताः ॥
प्रथमबीजमुदारमुदाहृतं ॥
अरुणयाभृगुणायुतमादितः ॥
सदहनंस्मरबीजमनंतरं ॥

2 किटिशरीरभृतापरिचुंबिता॥
भवतिशक्तिधरोसधनंजया॥
इयमशेषमनोरथदायिनी॥
सकलतंत्रनुता खलुपंचमी॥
3 बालाविद्यावदत्रापिबीजानान्नामभिस्त्रिकं॥
ऋष्यादिचविशेषस्तुदेवीत्रिपुरभैरवी॥
4 आद्येनषड्दीर्घयुजा षडंगन्यासईरितः॥
ततोध्यायेज्जमध्यान्नीं देवीं त्रिपुरभैरवीं॥
5 सोमशेखरारमालोचना॥
मुंडमालिकाकंठभूषणा॥
चंडशासनामोहिनीवरा॥
भीतिदागतिभैरवीमम॥
6 लक्षत्रयेजपद्विद्यांदशांशं जुहुयाद्धती॥
एवंसिद्धमनोमंत्रीकाम्यकर्माणिसाधयेत॥
7 तृतीयायादशीविद्या तादृशीपंचमींविदुः॥
तयैवसकलंसाध्यमनयापिचविद्यया॥

# तंत्रहृदयं

८ तेजस्त्रिपुरभैरव्यास्तत्वमालोकितंबुधैः॥
पृथिवीचांतरिक्षंद्यौरस्यास्तिस्त्रोमताः पुरः॥
९ पृथिव्यामग्निरूपेयमंतरिक्षेतटित्तनुः॥
दिविभास्करबिंबात्माशक्तिस्त्रिपुरभैरवी॥
१० प्रकाशकस्यैवहरस्यशक्तिः॥
र्भाभैरवीचापिबुधैरभाणि॥
प्रपंचनाथस्यपुमाकृतित्वे॥
नार्याकृतित्वंपरदेवतायाः॥
११ वन्हिर्यः प्रथमबीजेकृष्णवर्त्मासपार्थिवः॥
बीजेवन्हिर्द्वितीयेयः सशक्रस्तटिदात्मकः॥
१२ तृतीयबीजेयोवह्निर्मंडलात्मासभास्करः॥
एवंविदित्वायोविद्वांजपेत्तेनाखिलंजितं॥
१३ तेजोयद्रोचकन्नामत्वगिंद्रियमुपाश्रितं॥
आधिपिंडंतदंबायाः स्वरूपंपरिचक्षते॥
१४ तेजः सहकृतेनैवगृह्यतेमातरिश्वना॥
स्पर्शः संगच्छतेतस्मात्तेजोरूपंत्वगिंद्रियं॥

---

गणपतेः कृतौ तंत्रहृदये षष्ठस्त्रिपुरभैरवीपटलः समाप्तः